International Journal of Applied Research 2018; 4(8): 101-103




**ISSN Print:** 2394-7500
**ISSN Online:** 2394-5869
**Impact Factor:** 8.4
IJAR 2018; 4(8): 101-103
www.allresearchjournal.com
Received: 18-06-2018
Accepted: 25-07-2018

**डॉ0 इन्द्रेश कुमार झा**
अफजला बलिया, थाना–बिरौल,
दरभंगा, बिहार, भारत

**Corresponding Author:**
**डॉ0 इन्द्रेश कुमार झा**
अफजला बलिया, थाना–बिरौल,
दरभंगा, बिहार, भारत

# सनातनधर्मे व्यवहारतत्त्वसमीक्षणम्

**डॉ0 इन्द्रेश कुमार झा**

**प्रस्तावनाः**

धर्म एव हतो हन्ति धर्मो रक्षति रक्षितः[1]।

प्रजानां शासनविषये प्रतिपदं विधिव्यवस्था दण्डनीतिश्चावश्यिकी भवति। एतयोरवधारणं वैदिकयुगे तदानीन्तनसंहितानां निदर्शनेन बभूव। तथापि तत्र शाश्वतैकरूपता न परिलक्ष्यते। विभिन्नयुगेषु विरचितेषु पुरासाहित्येषु विवधरूपा विधिव्यवस्था दण्डनीतिश्च प्ररूपिता दृश्यत इत्यनेन स्पष्टं भवति यत् प्रजानां स्वत एव यानि विधानानि यद्रूपाणि लोकरीतिमनुसृत्य विकसितानि, तानि धर्मशास्त्रेषु संगृहीतानि राज्ञां कृते विधेयतामनुप्रापुः। राजाथवा तस्रू मन्त्रिमण्डलं वा राजपुरुषा वा विधि–निर्माण–प्रवर्तन– प्रक्रियाणां कर्तारो न सन्ति।
राज्ञां विधि–व्यवस्थापनमपवादरूपेण तत्र प्रावर्तत, तत्र पूर्वतो विधिधर्म– शास्त्रस्मृत्यादिषु नाभवत्। अस्यां स्थितावपि धर्मज्ञानां साह्येन राजा विमर्शपूर्वकं किञ्चितपरिवर्तनं वा नवीनविधिविधानं प्रवर्तयेतेति साधुपथः।

प्रजाशासन–प्रसङ्गे राज्ञः परं कर्तव्यं निर्धारयन् मनुः कण्टकशोधनमा–वश्यकं मेने।
प्रारम्भिकयुगे कौटुम्बिकन्याय–व्यवहारः क्वचित् प्रावर्तत। मनुर्वर्णयति–
भार्या पुत्रश्च दासश्च शिष्यो भ्राता सहोदरः।
प्राप्तापराधास्ताड्याः स्यू रज्ज्वा वेणुदलेन वा[2]।।

**न्यायिकदण्डविधानम्**
अपराधे सति असद्व्यवहारे, भ्रष्टाचारे च सति राजदण्ड आवश्यक इति प्रजासु शान्तिव्यवस्थापनाय शाश्वतरीतिर्वरुणादर्शमनुहरति। एतेष्वपराधादिषु नैके पापकोटिका सन्ति येषामपाकृतये धर्मशास्त्रविद्भिः पण्डितैः प्रायश्चित–दान – तपआदिविधानानुष्ठानं निर्दिष्टम्। स्वयमेव पापिनोऽनुशोचन्तः क्वचित् शास्त्रानु– सारेणात्मविशुद्धये धर्मशास्त्रज्ञमुपागच्छन्। ततः परमपि राजद्वारं दण्डनिर्णयाय बभूव[3]।
वैदिकयुगे न्यायपथे वरुणस्यादर्शः प्रत्यभात्। तस्याधिकारे दण्डविधानं प्रायश्चितविधानं चोभो प्रावर्तेताम्। तत्रासीत् प्रश्नविवाकः परवर्तिप्राड्विवाक– समः[4]। शतपथब्राह्मणानुसारेण राजा स्वयमदण्ड्यः। सोऽराधिनमदण्डयत्[5]।
अन्योपायैरपराधिनिर्णयेऽसम्भवे सति दिव्यपरीक्षा क्वचिदायोजिता[6]। सूत्रयुगे चौर्य भीषणापराधो गण्यते स्म। चौरो मृत्युदण्डभागासीत्[7]।
मनुरष्टादश विवादप्रकरणानि विज्ञापयति। तद्यथा–

तेषामाद्यमृणादानं निक्षेपोऽस्वामिविक्रयः।
सम्भूय च समुत्थानं दत्तस्यानपकर्म च।।
वेतनस्यैव चादानं संविदश्च व्यतिक्रमः।
क्रय–विक्रयानुशयो विवादः स्वामिपालयोः।।
सीमाविवादधर्मश्च पारुष्ये दण्डवाचिके।
स्तेयं च साहस्त्रं चैव स्त्रीसंग्रहणमेव च।।
स्त्रीपुंधर्मो विभागश्च द्यूतमाह्वय एव च[8]।

मनुः प्रकरणेऽस्मिन्नपराधप्रवृत्तिकान् लोकान् कण्टक इति परिभाषते। कण्टकाः शतविधा भवन्ति। प्रत्यक्षमप्रत्यक्षं वा ते लोकं क्षाययन्ति, वञ्चयन्ति वा।

अर्थशास्त्रानुसारेण न्यायालयो धर्मस्थीयो यस्तत्र न्यायाधिकारिणो धर्मस्था इति ख्याताः[9]। साधारणतः प्रधानन्यायाधिकारी राजाभूत्। कार्यभारेऽतिशयिते स श्रेष्ठब्राह्मणं न्यायाधीशपदे नियुक्तवान्। स न्यायसभया स्वकार्य समपाद– यत्[10]। न्याय–सभायां कौटिल्यानुसारेण त्रयो धर्मस्था स्त्रयोऽमात्याश्च कार्यविनिर्णयं कुर्वन्तिस्म। मनू राजानं ब्राह्मणत्रयं मन्त्रिणश्चन्याय–सभायां विज्ञापयति। यदि नाम राजा तत्रानुपस्थितोऽभवत्, न्यायसभाया अध्यक्षपदं कश्चित् श्रेष्ठविद्वान् ब्राह्मणोऽगृह्णात्। स एव प्राड्विवाक इति नाट्यशास्त्रे प्रसिद्धम्। प्राड्विवाकस्य अपननामानि धर्माध्यक्षः, धर्मप्रवक्ता, धर्माधिकरी च सन्ति[11]। वैदिकयुगे प्रश्नविवाक इति ख्यातो न्यायाधीश आसीत्[12]।
नाट्यशास्त्रानुसारेण प्राड्विवाकस्य विशेषा उद्भाविताः सन्ति–बुद्धिमान्, नीति–सम्पन्नः, निरलसः, प्रियंवदः, पररन्ध्र–विधिज्ञः, अर्शशास्त्रार्थकुशलः, अनुरक्तः, कुलोद्भवः, देशकालवित्, व्यवहारर्थतत्त्वज्ञः, बहुश्रुतः, मध्यस्थः, धार्मिकः, धीरः, कार्याकार्यविवेकी, क्षान्त, दान्तः, जितक्रोधः, समदर्शी, उत्थितः, अप्रमत्तः, जितश्रमः, स्निग्धः, विनीतः, निपुणः, नयज्ञः, ऊहापोह–विचक्षणः, सर्वशास्त्रार्थसम्पन्नश्च[13]।
सभ्याः सच्चरित्रा भवेयुरिति धर्मशास्त्रकाराणां मतम्। यदि नाम राजा क्वचिदन्यायप्रवृत्तः प्रत्यगात् सभ्यैः स न्यायपथे प्रवर्तितः[14]। ब्राह्मणास्तत्र धर्म– शास्त्रीयं सम्मतं प्रकाशयन्।
सभ्या न्यायाधीशाश्चान्ये वा यदि न्यायपथं परित्यज्यान्यायमकुर्वन्नकार– यन्वा, तेऽपि दण्ड्या आसन्निति केषाञ्चिद् धर्मशास्त्रकाराणां मतम्[15]। अथ चान्या–यस्तु पापमेव। तस्य फलं प्रतिवादी, न्यायाधीशः, साक्षी, सभ्याश्च भजन्ते[16]।
कौटिल्य उत्कोचग्राहिणो धर्मस्थस्य निग्रहार्थं नियमयत्यधोविधम्– धर्मस्थं विश्वासोपगतं सत्री (गुप्तचरः) ब्रूयात् – 'असौ मे बन्धुरभियुक्तः। तस्यामनर्थः। प्रतिक्रियताम्। अयं चार्थः प्रतिगृह्यताम्। स चेत् तथा कुर्यात्, उपदाग्राहक इति प्रवास्येत्[17]। स आदर्श धर्मस्थान् परिभाषतेऽर्थशास्त्रे –

समाः सवेषु विश्वास्या लोकसम्प्रियाः[18]।

न्यायालयो धर्माधिकरणम्, अधिकरणम्, धर्मस्थानं धर्मासनं चेति। वैदिकयुगे राजधान्यां स्वप्रासादे सभायां वा राजा न्यायकरोत्। तदा ग्रामणीः ग्रामसभायां विवादानां समाधानं व्याकरोत्। परवर्तियुगे चतुर्विधा न्यायालया यथावश्यकं विकसिताः– प्रतिष्ठिता, अप्रतिष्ठिता, मुद्रिता तथा शासिता (शास्त्रिता)[19]।

राजाधिष्ठतन्यायालयास्तु यथा, बृहस्पतिर्वर्णयति,
माल्यधूपासनोपेबीजरत्नसमन्विताः स्युः।

प्रतिमालेख्यदेवैश्च युक्तोऽग्न्यम्बुना तथा। राजधर्मकाण्डे पृ0 20 उद्धृतम् न्यायमधिकर्त्तृ श्रेणीनां[20], पूगानां[21] च स्वतन्त्रव्यवस्था तयोः प्रतिनिधिभिः सम्पादितासीत्[22]। न्यायार्थवादिप्रतिवादिनां दूरगमनगनपेक्षितमासीत्। वस्तुतो देशकालविभागेन बहुविधानि न्यायस्थानानि प्रचरितानि बभूवुः। तेषु भृगुर्दश– विधानि नामयति–

आरण्यकास्तु स्त्रकैकुर्युः सार्थिकाः सार्थिकैस्तथा।
सैनिकाः सैनिकैरेव ग्रामेऽप्युभयवासिनः।
उभयानुमतं चैव गृह्यते स्थानमीप्सितम्।।
कुलिकाः सार्थमुख्याश्च पुरग्रामनिवासिनः।
ग्रामपौरगणश्रेण्यश्चातुर्विध्यश्च वर्णिताः।।
कुलानि कुलिकाश्चैव नियुक्तो नृपतिस्तथा।
एतेषु कुलिका वादिप्रतिवादिपक्षयोर्ज्येठमहाजना आसन्।।

'वेदा विभिन्नाः स्मृतयो विभिन्नाः' इति समालोच्य दण्डादिनिर्धारणे विरोधे सति स्वतर्कबुद्ध्या यथायोग्यवधारणीयम्[23]। अत्र पुराणपुरुषाणामभिप्रायः प्रमाण–मिति धारणा स्वीकृता। ब्राह्मणैः कृता न्यायालया धर्मविषयकनिर्णयान् साधयन्ति स्म। तद्यथा मनुः प्रथयति–

दशावरा वा परिषद् यं धर्मं परिकल्पयेत्।
त्र्यवरा वापि वृत्तस्था तं धर्मं न विचालयेत्[24]।।

व्यवहार – विधाः – त्रिविधा व्यवहाराः परीक्षिता आसन्– हिंसामूला (अपराधजाताः), धनमूलाः (सम्पत्ति–जाताः), राजाश्रिताश्च। राजाश्रिता व्यवहारा नारदेन प्रकीर्णका इति व्याख्याताः। तत्र राजा स्वयमेव वादीभूय व्यवहारमुद् भावयति। राजाज्ञा–प्रतीघातः, राजकर्मकरणं, पुरप्रदानं, प्रकृतीनां सम्भेदः, पाखण्डिनैगम–श्रेणी–गणधर्मविर्पयः, पितापुत्रविवादः, प्रायश्चित्तव्यतिक्रमः, प्रतिग्रहविलोपः आश्रमिणां कोपः, वर्णसौरदोषः, तदवृत्तिनियमश्चेति न्याय–व्यवहारविषयाः।
दाण्डिकविशेषाः – मनुर्दण्डस्वरूपं सारसङ्क्षेण ब्रवीति–

अधार्मिकं त्रिभिन्यायैर्निगृह्णीयात् प्रयत्नतः।
निरोधनेन बन्धेन विविधेन वधेन च[25]।।

अत्र वधस्तु अङ्गभञ्जनच्छेदनकशाप्रहारादिरपि भवति[26]। निष्पक्षन्यायस्य निदर्शनं मनुस्मृतावधोविधं पुरस्कृतम्–

पिताचार्यः सुहनमाता भार्या पुत्रः पुरोहितः।
नादण्ड्याः नाम राज्ञोऽस्ति यः स्वधर्मे न तिष्ठति[27]।।

न्यायपथे राजा कदापि क्रोधं न कुर्यात् यद्यपि। कार्यार्थिनो बाला वृद्धा आतुरास्तमधिक्षिपेयुः, तस्य क्षमाभाव एव प्रशस्यः[28]।
येन केन प्रकारेण कश्चौर इति ज्ञेयमासीत्। यदि सोऽदण्डितो भवति तर्हि राजा पापभाग्भवति। सन्देहपदेन चौरादीनां पापानां विमुक्तिर्नासीदिति मनुमतम्[29]।
कस्यचिदपराधस्य न केवलं कर्तैव दण्डार्हो भवति अपितु तत्र सम्बद्धा अपि जना पापभाजः सन्तीति मनुर्निदर्शयति–

अन्नादे भ्रूणहा मार्ष्टि पत्यौ भार्यापचारिणी।
गुरौ शिष्यश्च राज्यश्च स्तेनी राजनि किल्विषम्[30]।।

यत् किञ्चित् चोरितं नाशितं वा तत् स्वामिने चौरेण प्रदेयमासीत्। दण्डोऽपरिहार्य आसीदेव[31]।
चोरितवस्तुनो मूल्यं महत्त्वं च विचार्य चौर्यस्य देशकालादिकं चावधार्य दण्डस्य मात्रावधारणीया[32]। तथैवापराधस्यानर्थभावस्य मात्रा विचारणीयासीत् दण्डविधानो[33]। कः कस्य कियन्मात्रं हानिमाचरति प्रसभमप्रसभं वेति दण्डस्य मात्रा–प्रकारादिनिर्धारणेऽवश्यमेव भावयितव्यम्।
उत्तरोत्तराभिजात्येन क्वचिद् दण्डस्य मात्रा वर्धनीयेति मनुः स्पष्टयति–

अष्टापाद्यं तु शूद्रस्य स्तेये भवति किल्विषम्।
षोडशैव तु वैश्वस्य द्वात्रिंशत्क्षत्रिस्य च।।
ब्राह्मणस्य चतुः षष्टिपूर्णं वापि शतं भवेत्।
द्विगुणा वा चतुः षष्टिस्तद्दोषगुणविद्धि सः[34]।।

अपराधिनां पापानां वा बहिष्कारो दण्डस्य विरलमपि स्वरूपं महत्त्वपूर्णं प्रतिभाति। तद्यथा–

योऽदत्तादायिनो हस्ताल्लिप्सेत ब्राह्मणो धनम्।
याजनाध्यापनेनापि यथा स्तेनस्तथैव सः[35]।।

दण्डस्तु शीघ्रतिशीघ्रमवसेयमासीदिति मनुमतं साधुवादमर्हति। तथाहि–

'नोपेक्षेत क्षणमपि राजा साहसिकं नरम्'[36]।

**सन्दर्भ– ग्रंथ सूचीः**


1. मनु0– 8.15
2. मनु0– 8.299
3. अकुर्वाणा एव तु प्रायश्चित्तं राज्ञा वध्याः। गौतमधर्मसूत्र– 3.1. 1 अधिकृत्यमिताक्षरावृत्तिः। मनुस्मृति– 9.236। राजापि स्वपदोचितौदात्य–विहीनो राजपदात् प्रजाभिश्चयावित्। मन्वनुसारेणान्यथकरणेऽमात्या प्राड्विवाको राजा वा दण्ड्यः। तद्यथा–
   अमात्याः प्राड्विवाको वा यत्कुर्युः कार्यमन्यथा।
   तत्स्वयं नृपतिः कुर्यात्तान् सहस्त्रं च दण्डयेत्।। – (मनु0 – 9.238)
   कार्षापणं भवेद्दण्ड्यो यत्रान्यः प्राकृतो जनः।
   तत्र राजा भवेद्दण्ड्यः सहस्त्रमिति धारणा।। – (मनु0 – 8. 336)
4. वाजसनेयिसंहिता– 30.10। अत्र प्रश्नी, अभिप्रश्नी च वादी, प्रतिवादी स्तः।
5. शतपथ0– 5.4.4.7
6. दिव्यपरीक्षा पञ्चविंशब्राह्मणे 14.6.6; छान्दोग्योपनिषदि– 6.16
7. गौतम0– 12.43। आपस्तम्बे– 1.9.25.4
8. मनु0– 8.4–7
9. अर्थ0– 3.1
10. को न्यायाधीशपदयोग्य इति विनिर्णये आपस्तम्बः–
    विवादे विद्याभिजनसम्पन्ना वृद्धा मेधाविनो धर्मेष्वनिपातितः। (धर्मसूत्रे– 2.2.29.5)
    न्यायाधीशस्य गुणाः काव्यायत्ता अधोविधं वर्णिता मृच्छकटिके–
    शास्त्रज्ञः कपटानुसारकुशलो वक्ता न च क्रोधनः–
    स्तुल्यो मित्रपरस्वकेषु चरितं दृष्टैव दत्तोत्तरः।
    क्लीबान् पालयिता शठात् व्यथयिता धर्म्यो न लोभान्वितो
    द्वार्भावे परतत्त्वबद्धहृदयो राजश्च कोपापहः।। (9.5)
11. राजनीतिरत्नाकर पृ0– 18। मनुस्मृति– 8.20
    प्राड्विवाकः गौतमधर्मसूत्रे– 13.26, 27, 31 वर्णितः।
12. वाजसनेयिसंहिता– 30.10। तैत्तिरीयब्राह्मण– 3.4.6.1। अत्र वादी, प्रतिवादी च क्रमशः प्रश्नी, अभिप्रश्नी च संज्ञितौ।
13. नाट्यशास्त्रे– 24.82'88
14. अधर्माय यदा राजा नियुञ्जीत विवादिनाम्।
    विज्ञाप्य नृपतिं सभ्यस्तदाकार्यं निवर्तयेत्।। (राज0 र0, पृ0–24)
15. विष्णुधर्मसूत्र– 5.180। पराशरमाधवीये– 3.35। स्मृतिचन्द्रिका द्वितीयभागे पृ0– 22
    शुक्रनीतिसारे 4.5.63.64, 93, 282।
16. बौधायनधर्मसूत्र– 1.10.30, 31 । मनुस्मृति– 8.18, 19
17. अर्थशास्त्रे– 4.4.2
18. अर्थशास्त्रे– 3.20.31
19. राजधान्यां नगरेषु वा सर्वजनसुलभस्थले आरोपिताभवत्। अप्रतिष्ठिता यथावश्यके ग्रामे ग्रामे भ्रान्ता बभूव। मुद्रितायां राज्ञा नियुक्तो न्यायाधीशो व्यवहारनिर्णयं समपादयत्। तस्य शासनादिकं राजमुद्रयाङ्कितं बभूव। शासितायां राजा स्वयमेव न्यायाधीशो बभूव इति बृहस्पतिरपराक्रेणोद्धृतः।
20. समानव्यवसायव्यापृतानां लोकानां समवायः।
    कारुः शिल्पी संहतैर्द्वयोः श्रेणिः सजातिभिः।। (अमरकोशे– 4. 10.5)
21. पूगो लोकानां वृन्दः । (अमरकोशे– 3.3.20)
22. राज्ञां ये विदिताः सम्यक् कुलश्रेणिगणादयः।
    साहसन्यायवर्ज्याति कुर्युः कार्याणि ते नृणाम्।। (शुक्रनीतिसारे– 4.5.30)
    व्यासः समर्थयति–
    वणिक्शिल्प्रिभृतिषु कृषिरत्रेपजीविषु।
    अशक्यो निर्णयो ह्यन्यैस्तदीयैरेव कारयेत्।।
    बृहस्पतिः शुक्रश्च–
    कीनाशाः कारुकाः शिल्पि–कुसीदि– श्रेणिनर्तकाः।
    लिन्निस्तस्कराः कुर्युः स्वेन धर्मेण निर्णयम्।
    गौतमेन प्रागेव निदर्शितम्–
    कर्षक– वणिक्यशपाल– कुसीदिकारवः स्वे स्वे वर्गे। तेभ्यो यथाधिकारमर्थान् प्रत्यवहृत्य धर्मव्यवस्था। (11. 21, 22)
    मनुः समर्थयति–
    जातिजानपदान् धर्मान् श्रेणीधर्मांश्च धर्मवित्।
    समीक्ष्य कुलधर्मांश्च स्वधर्मं प्रतिपादयेत्।। (8.41)
23. न्यायमधिकृत्य पुरा सूत्रस्मृतिकोटिकं विपुलं साहित्यं विरचितम्। तत्र मनुना विरचिता स्मृतिः प्रामुख्यं भजते। अन्ये प्रमुखग्रन्था अधोविधा विद्यन्ते–
    स्मृतयः – याज्ञवल्क्यस्मृतिः, नारदस्मृतिः, बृहस्पतिस्मृतिः, शुक्रनीतिसारः, स्मृति– चन्द्रिका, स्मृतिमुक्ताफलम्, कात्यायनस्मृतिसारोद्धारः, कामन्दकीयनीतिसारः।
    धर्मसूत्राणि– आपस्तम्बधर्मसूत्रम्, गौतमधर्मसूत्रम्, बौधायनधर्मसूत्रम्, वसिष्ठधर्मसूत्रम्।
    अन्ये ग्रन्थाः– महाभारतम्, अर्थशास्त्रम्, विवादचिन्तामणिः, विवादरत्नाकरः, व्यवहारतत्त्वम्, व्यवहारनिर्णयः, व्यवहारमयूखः, व्यवहारमातृका, व्यवहारसारः, दण्डविवेकः, राजनीतिप्रकाशः, पराशरमाधवीयम्, दीपकलिका, मानसोल्लासः, सरस्वती–विलासः, राजनीतिरत्नाकरः अपरार्कचन्द्रिका।
24. मनु0– 12.110
25. हिंसामूला व्यवहारा चतुर्भिद आसन्– वाक्पारुष्यं, दण्डपारुष्यं (शारीरिकक्षतिः), साहसं (हत्यादिकानि घोरकर्माणि), स्त्रीसंग्रहः (परस्त्रीसमागमः) धनमूला व्यवहारा चतुर्दशभिद आसन्।
26. मनु0– 8.310
27. तथाहि– कार्योऽर्धपादिकः। – (मनु0– 8.325);
    येन येन यथात्रे स्तेनो नृषु विचेष्टते।
    तत्तदेव हरेत्तस्य प्रत्यादेशाय पार्थिवः।। – (मनु0 – 8.334)
28. मनु0– 8.335
29. मनु0– 8.312–313
30. मनु0– 8.316। तथापि सन्देहपदे दण्डं न कुर्यादिति आपस्तम्बः– 2.5.11–12
31. मनु0– 8.317
32. मनु0– 8.319–320
33. मनु0– 8.324, 326–329
34. मनु0– 8.322–333
    क्वचिच्चोरितमप्यचौर्यं भवतीति मनुर्निर्दिशति–
    वानस्पत्यं मूलफलं दार्वग्न्यर्थं तथैव च।
    तृणं च गोभ्यो ग्रासाथमस्तेयं मनुरब्रवीत्।। – (मनु0– 8.339)
    द्विजोऽध्वगः क्षीणवृत्तिर्द्वाविक्षू द्वे च मूलके।
    आददानः परक्षेत्रान्न दण्डं दातुमर्हति।। – (मनु0– 8.341; 3.5 अन्यच्च– 8.317)
35. मनु0– 8.337–338
36. मनु0– 8.340